# DAV PUBLIC SCHOOLS, JHARKHAND ZONE B
# PRACTICE TEST

**Class: VIII** **FM: 80**
**Subject: Sanskrit** **Time: 2 H 30 Mins**

**खण्ड क (अपठित गद्यांश 10 अंका:)**

**1. अधोलिखित गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत_**

सायंकालः भवति। सूर्यः तु अस्तं गच्छति । खगाः स्वनीडानि गच्छन्ति। कमलानि म्लानानि भवन्ति कुमुदानि च विकसन्ति । सर्वे जनाः स्वगृहम् आगच्छन्ति । रात्रौ उलूकाः इतस्ततः भ्रमन्ति । पथिकाः विश्रामाय तिष्ठन्ति । बालकाः क्रीडाक्षेत्रात् स्वं गृहम् आगच्छन्ति । गृहम् आगत्य विविधान् आहारान् खादन्ति । रात्रौ सर्वत्र अन्धकारस्य राज्यम् भवति ।

I. एकपदेन उत्तरत- (1×2=2)
i) कः अस्तं गच्छति ? ii) कानि विकसन्ति?

II. पूर्णवाक्येन उत्तरत_ (2×2=4)
क) बालकाः कुतः गृहम् आगच्छन्ति ?
ख) रात्रौ उलूकाः कुत्र भ्रमन्ति?

III. निर्देशानुसारं उत्तरत- (1×3=3)
क)" भ्रमन्ति" इति क्रिया पदस्य कर्तृपदं किम ?
ख) 'पथिकाः' इति कर्तृपदस्य क्रियापदं किम्?
ग)' विविधान्' इति विशेषणपदस्य विशेष्य पदं किम्?

IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत_ (1×1=1)

**खण्ड ख ( रचनात्मक कार्यम् 15 अका:)**

**2.** अत्र प्रधानाचार्यं प्रति एकं प्रार्थना-पत्रं लिखितम् अस्ति । मञ्जूषातः समुचितं पदं चित्वा रिक्त स्थानानि पूरयन्तु _ (5)

सेवायाम्
( i) _______________ प्रधानाचार्याः
डी . ए . वी. विद्यालयः राँची नगरम् ।
महोदयाः
सविनयं (ii)_______ अस्ति यत् अहम् (iii)___ कक्षाया : छात्र : अस्मि। संस्कृत- भाषायां (iv)________ अतीव रुचिः अस्ति । अहम् प्रतिवर्षं (v)___ शत-प्रतिशतम् अङ्कान् प्राप्नोमि । अहम् (vi)_________ भाषाम् अग्रिम- कक्षायाम् अपि (vii)_ __________ इच्छामि । अतः नवम्यां कक्षायां संस्कृत- पठनाय मह्यम् (viii)___________ प्रदाय अनुग्रहं कुर्वन्तु (ix)____________ इति प्रार्थये ।

धन्यवादाः ।
(X) ________ शिष्यः
रमेशः

**मञ्जूषा** ( अनुमतिं , निवेदनम् , भवताम् , मान्याः, मम, एताम् , भवन्तः , पठितुम् , संस्कृते, अष्टम्याः)

**3. अधोलिखितानि वाक्यानि संस्कृतभाषायां अनुवादं कृत्वा लिखत ( केवलं पञ्चवाक्यानि)** 1×5=5

क) छात्र कलम से लिखता है।
ख) मेरा भाई जयपुर में रहता है ।
ग) मैं संस्कृत पढ़ूँगा ।
घ) तुमसब कहाँ जा रहे हो?
ङ) वह गीता पढ़ेगा ।
च) राधा मन्दिर जाती है।
छ) मेरे पिताजी कार्यालय गए।

**4. चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत_** 1×5=5
**मञ्जूषा** ( नदी, बकाः, वृक्षौ, हंसौ, जलम्, नौका, स्वच्छम् , वर्तकौ , तीरे, भवनानि, उन्नतानि)



**<u>खण्ड ग (अनुप्रयुक्त व्याकरणम् 25 अंकाः)</u>**

**5.** सन्धि अथवा सन्धि- विच्छेदं कृत्वा लिखत_ (3)
क) मम नाम ( देवेन्द्रः) अस्ति ।
ख) बालकाः ( विद्यालयं) गच्छन्ति ।
ग) हनुमान ( कपीशः) कथ्यते ।

**6.** उचितं सख्या पदैः रिक्त स्थानानि परयत_ (3)
क) तत्र__________(1) महिला उपदिशति ।
ख) उद्याने________(2) बालकौ क्रीडतः ।
ग) पाण्डवाः________(5) आसन्।

**7.** प्रकृति- प्रत्ययौ संयोज्य विभज्य वा लिखत - (3)

क) सुधा (पठित्वा) क्रीडति ।

ख) मोहनः तत्र (गम्+ तुमुन्) इच्छति ।

ग) सेवक: नृपं (प्र+ नम्+ल्यप्) उपविशति ।

**8.** कोष्ठके प्रदत्त पदानां विभक्ति तत्कारणं च लिखन्तु - (4)

क) अलम् (कलहेन) ।

ख) (बालकाय) दुग्धं रोचते।

ग) ( गुरुं) परितः शिष्याः सन्ति।

घ) पुत्रः (पित्रा) सह भ्रमति ।

**9.** उचित शब्दरूपं चित्वा रिक्तस्थानानि पूरयत- (4)

क) इदं_______ पुस्तकं अस्ति । ( रामं/ रामात्/ रामस्य)

ख)_________ पुष्पाणि शोभन्ते । ( लताः/ लतासु/ लताभिः)

ग)_____ अधुना कुत्र गच्छथ ? ( त्वम्/ युवाम्/ यूयम्)

घ) वने_______ तपः कुर्वन्ति । ( मुनिः/ मुनयः/ मुनये)

**10.** उचितं धातुरूपं चित्वा वाक्यानि पूरयत - (4)

क) यूयम् रामायणं________ । ( पठेयुः/ पठेत/ पठेयम्)

ख) सः तत्र ____________ । ( गच्छतु/ गच्छ/ गच्छानि)

ग) शिष्य : गुरुं_________ । ( सेवन्ते/ सेवसे/ सेवते)

घ) मुनयः आश्रमे यज्ञं_______ । ( करोतु/ करोषि/ कुर्वन्ति)

**11.** उपसर्गं संयोज्य विभज्य वा लिखत_ (2)

क) अध्यापक: छात्रान् (आदिशति) ।

ख) घात्र : विषयम् ( अव+ गच्छति) ।

**12.** उचितं अव्ययपदं चित्वा रिक्तस्थानानि पूरयत (2)

क) ईश्वरः______ अस्ति । ( कुत्र/ ह्यः/ सर्वत्र)

ख) कुक्कुराः मार्गेषु ______ भ्रमन्ति स्म । ( इतस्ततः/ यदा/ अत्र)

## <u>खण्ड- घ ( पठित- अवबोधनम्-30 अंकाः)</u>

**13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-** (5)

एकदा सः काशीनगरे गङ्गायाः तटे एकस्मिन् कुटीरे शिष्यैः सह अतिष्ठत् । तत्र समीपम् एव एकः यात्री अपि अतिष्ठत् । ईर्ष्यया सः यात्री महर्षे : कुटीरम् आगत्य अकारणम् एव महर्षिं कटुवचनानि वदति स्म। जितेन्द्रियः महर्षिः सर्वं श्रुत्वा शान्तचित्तेन एव तिष्ठति स्म। सः कदापि न प्रत्युदरत् शिष्याः क्रुद्धाः अभवन्। महर्षि : तान्" चिन्तां मा कुरुत, तूष्णीं भवत" इति अकथयत् । महर्षिः कथयति स्म यत् सः स्वयम् एव एकस्मिन् दिने सरलः भविष्यति ।

I. एकपदेन उत्तरत- (1/2×2=1)

क) महर्षिः दयानन्दः कस्याः तटे अतिष्ठत् ?

ख) सः यात्री कीदृशानि वचनानि वहतिस्म ?

II. पूर्णवाक्येन उत्तरत- (1×2=2)

क) महर्षिःशिष्यान् किम् अकथयत् ?

ख) महर्षिः कुत्र वसति स्म ?

III. निर्देशानुसारम् उत्तरत- (1×2=2)

क)' शिष्याः' इति कर्तृपदस्य क्रियापदं किम्?

ख) ' दूरम् ' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**14.** अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत- (5)

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्यायात्पथः प्रविचलन्ति पदं न धीराः ॥

I. एकपदेन उत्तरत- ` (1/2×2=1)

क) के निन्दन्तु स्तुवन्तु वा ?

ख) धीराः कस्मात् पथः न प्रविचलन्ति ?

II. पूर्णवाक्येन उत्तरत- (1×2=2)

क) का यथेष्टम् समाविशतु गच्छतु वा ?

ख) मरणं कदा भवतु?

III. निर्देशानुसारं उत्तरत- (1×2=2)

क) समाविशतु' अस्य पदस्य किं विलोमपदं श्लोके प्रयुक्तम ?

ख)" धैर्यवन्तः" अस्य पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

**15.** अधोलिखितं नाट्याशं पठित्वा प्रश्नानाम् उत्तराणि लिखत- (5)

आचार्य :- शोभनम्। अधुना प्रारम्भं कुर्वन्तु ।
प्रणवः- ' संस्कृतम्' इति पदस्य कः अर्थः ?
विश्वासः- ' शुद्धम्' ' परिष्कृतम्' इति संस्कृतपदस्य अर्थ: अस्ति ।
सुमेधा- संस्कृत भाषाया : कति रूपाणि सन्ति ?
प्रबुद्धः - सस्कृतभाषाया : द्वे रुपे स्तः । एकं वैदिकं संस्कृतम् द्वितीयं च लौकिक संस्कृतम् ।
प्रणवः - वैदिक संस्कृतस्य किं प्रमुखं साहित्यं अस्ति?
निष्ठा - चत्वारः वेदाः ब्राह्मणग्रन्थाः आरण्यक ग्रन्थाः उपनिषदः च वैदिकं साहित्यं कथ्यते ।

I. एकपदेन उत्तरत- (1/2×2=1)

क) वेदः कति सन्ति?

ख) ' शोभनम्' इति कः वदति?

II. पूर्णवाक्येन उत्तरत _ (1×2=2)

क) संस्कृतभाषायाः कति रूपाणि सन्ति?

ख) वैदिक साहित्ये किं किम् अस्ति?

III. निर्देशानुसारं उत्तरत_ (1×2=2)

क)' प्रमुखं साहित्यं ' अनयोः पदयोः किं विशेषणं पदम् ?

ख) ' अशुद्धं ' पदस्य किं विलोमपदं संवादे प्रयुक्तम् ?

**16.** कोष्टके प्रदत्त पदमाधृत्य प्रश्न निर्माणं कृत्वा लिखत - (1×4=4)

क) उत्तमाः ( मानम्) इच्छन्ति ।

ख) सन्मित्र ( पापात्) निवारयति।

ग) ( नद्याः) जलं प्रदूषितं न करणीयम् ।

घ) मम तटेषु ( ऋषयः) तपस्यां कुर्वन्ति ।

**17. मञ्जूषातः पदानि चित्वा श्लोकस्य अन्वयं लिखत** - (1/2×4=2)

अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम ॥

अन्वयः - अधमाः (i) ____________ इच्छन्ति, (ii) -__________ धनं मानं च (इच्छन्ति) । उत्तमाः मानम् (iii)__________- , मानः हि (iv)_________ धनं भवति ।

**मञ्जूषा-**( इच्छन्ति, महताम् , धनम् , मध्यमाः)

**18. अधोलिखितसूक्तेः भावार्थं मञ्जूषातः चित्वा पूरयत -** (1/2×4=2)

सूक्तिः - जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

भावार्थः - जन्मभूमिः (i)________इव अस्ति । (ii) __________माता इव जनान् पालयति। अस्याः (iii)____________ स्वर्गात् अपि उच्चतरम् (iv)___________ ।

**मञ्जूषा-** ( जन्मभूमिः , स्थानम् , अस्ति , माता )

**19. अधोलिखित वाक्यानि कथा क्रमानुसारेण लिखन्तु-** (3)

क) ग्रीष्मकाले चटकायाः तृणैः निर्मितं गृहं नष्टम् अभवत् ।

ख) उदारहृदया चटका काकस्य साहाय्यं करोति ।

ग) येन काकः लज्जितः अभवत् ।

घ) वर्षाकाले काकस्य मृत्तिकायाः गृहं नष्टम् अभवत् ।

ङ) काकः चटका च द्वे मित्रे आस्ताम् ।

च) अभिमानी काकः चटकायै स्वगृहे शरणं न अयच्छत् ।

**20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत-** (4)

| | |
|---|---|
| i) वसुन्धराया : | विख्याता |
| ii) सागरम् | भूमेः |
| iii) तटे | समुद्रम् |
| iv) प्रसिद्धा | तीरे |

**********